# ધ્યાનમ્

ૐ ગમ્ ગણપતયે નમઃ ॥

ગજાનનમ્ ભૂતગણાધિસેવિતમ્
કપિત્થજમ્બૂફ્લસારભક્ષિતમ્ ।
ઉમાસુતમ્ શોકવિનાશકારક
નમામિ વિઘ્નેશ્વરપાદપંકજમ્ ॥

ૐ શ્રીશરવણભવાય નમઃ ॥

ષડાનનમ્ કુમ્કુમરક્તવર્ણં
મહામતિ દિવ્યમયૂરવાહનમ્ ।
રુદ્રસ્ય સૂનુમ્ સુરસૈન્યનાથમ્
ગુહમ્ સદાઅહમ્ શરણમ્ પ્રપદ્યે ॥

# શ્રીસંકટનાશન ગણેશસ્તોત્ર

શ્રી ગણેશાય નમઃ
નારદ ઉવાચ

પ્રણમ્ય શિરસા દેવમ્ ગૌરીપુત્રમ્ વિનાયકમ્ ।
ભક્તાવાસમ્ સ્મરેન્નિત્યમ્ આયુઃ કામાર્થસિદ્ધયે ॥૧॥

પ્રથમમ્ વક્રતુંડમ્ ચ એકદન્તમ્ દ્વિતીયકમ્ ।
તૃતીયમ્ કૃષ્ણપિંગાક્ષમ્ ગજવક્ત્રમ્ ચતુર્થકમ્ ॥૨॥

લમ્બોદરમ્ પંચમમ્ ચ પષ્ઠમ્ વિકટમેવ ચ ।
સપ્તમમ્ વિઘ્નરાજમ્ ચ ધૂમ્રવર્ણમ્ તથાષ્ટમમ્ ॥૩॥

નવમમ્ ભાલચંદ્રમ્ ચ દશમમ્ તુ વિનાયકમ્ ।
એકાદશમ્ ગણપતિમ્ દ્વાદશમ્ તુ ગજાનનમ્ ॥૪॥

દ્વાદશૈતાનિ નામાનિ ત્રિસંધ્યમ્ યઃ પઠેન્નરઃ ।
ન ચ વિઘ્નભયમ્ તસ્ય સર્વસિદ્ધિકરમ્ પ્રભો ॥૫॥
વિદ્યાર્થી લભતે વિદ્યાં ધનાર્થી લભતેધ્નમ્ ।
પુત્રાર્થી લભતે પુત્રાન્ મોક્ષાર્થી ક્ભતે ગતિમ્ ॥૬॥

જપેદ્ ગણપતિસ્ત્રોત્રમ્ ષડ્ભિર્માસૈઃ ફલમ્ લભેત્ ।
સંવત્સરેણ સિદ્ધિં ચ લભતે નાત્ર સંશયઃ ॥૭॥
અષ્ટેભ્યો બ્રાહ્મણેભ્યશ્ર્વ લિખિત્વા યઃ સમર્પયેત્ ।
તસ્ય વિદ્યા ભવેત્સર્વા ગણેશસ્ય પ્રસાદતઃ ॥૮॥

ઇતિ શ્રીનારદપુરાણે સંકટનાશનગણેશસ્તોત્રમ્ સંપૂર્ણમ્ ॥

*******

ગણનાથ નમો નમસ્તે

વિઘ્નેશ્ર્વરાય વરદાય સુરપ્રિયાય
લમ્બોદરાય સકલાય જગદ્ધિતાય ।

નાગાનનાય શ્રુતિયજ્ઞવિભૂષિતાય
ગૌરિસુતાય ગણનાથ નમો નમસ્તે ॥

*******

# શ્રીગણપતિ અથર્વશીર્ષ

॥ શ્રીગણેશાય નમઃ ॥

ૐ ભદ્રમ્ કર્ણેભિઃ શૃણુયામ દેવાઃ ભદ્રમ્ પશ્યેમાક્ષભિર્યજત્રાઃ ।
સ્થિરૈરંગૈસ્તુષ્ટુવાગૂમ્ સસ્તનૂભિઃ વ્યશેમ દેવહિતમ્ યદાયુઃ ॥૧॥

ૐ સ્વસ્તિ ન ઇન્દ્રો વૃદ્ધશ્રવાઃ સ્વસ્તિ નઃ પૂષા વિશ્વવેદાઃ ।
સ્વસ્તિનસ્તાક્ષ્યો અરિષ્ટનેમિઃ સ્વસ્તિ નો બૃહસ્પતિર્દધાતુ ॥૨॥

ૐ શાન્તિઃ શાન્તિઃ શાન્તિઃ

અથ ગણેશાથર્વશીર્ષ વ્યાખ્યાસ્યામઃ ॥

॥ ૐ નમસ્તે ગણપતયે ॥

ત્વમેવ પ્રત્યક્ષમ્ તત્ત્વમસિ । ત્વમેવ કેવલમ્ કર્તાસિ ।
ત્વમેવ કેવલમ્ ધર્તાસિ । ત્વમેવ કેવલમ્ હર્તાસિ ।
ત્વમેવ સર્વં ખલ્વિદમ્ બ્રહ્માસિ ।
ત્વમ્ સાક્ષાદાત્માસિ નિત્યમ્ ॥ ૧ ॥

ઋતમ્ વચ્મિ । સ્તયમ્ વચ્મિ ॥ ૨ ॥

અવ ત્વમ્ મામ્ । અવ વક્તારમ્" ।
અવ શ્રોતારમ્" । અવ દાતારમ્" ।
અવ ધાતારમ્" । અવાનૂચાનમવ શિષ્યમ્ અવ પશ્ચાતા"ત્ ।
અવ પુરસ્તા"ત્ । અવોત્તરાતા"ત્ । અવ દક્ષિણાતા"ત્ ।
અવ ચોર્ધ્વાતા"ત્ । અવાધરાતા 'ત્ ।
સર્વતો મામ્ પાહિ પાહિ સમમ્તાત્ ॥ ૩ ॥

ત્વમ્ વાઙ્મયસ્ત્વમ્ ચિન્મયઃ । ત્વમાનંદમયસ્ત્વમ્ બ્રહ્મમયઃ ।
ત્વમ્ સચ્ચિદાનંદાદ્વિતીયોઽસિ । ત્વમ્ પ્રત્યક્ષમ્ બ્રહ્માસિ ।
ત્વમ્ જ્ઞાનમયો વિજ્ઞાનમયોઽસિ ॥ ૪ ॥

સર્વં જગદિદમ્ ત્વત્તો જાયતે । સર્વં જગદિદમ્ ત્વત્તસ્તિષ્ઠતિ ।
સર્વં જગદિદમ્ ત્વયિ લયમેષ્યતિ । સર્વં જગદિદમ્ ત્વયિ પ્રત્યતિ ।
ત્વમ્ ભૂમિરાપોઽનલોઽનિલો નભઃ । ત્વમ્ ચત્વારિ વા"ક્પદાનિ ॥ ૫ ॥

ત્વમ્ ગુણત્રયાતીતઃ । ત્વમ્ અવસ્થાત્રયાતીતઃ ।
ત્વમ્ દેહત્રયાતીતઃ । ત્વમ્ કાલત્રયાતીતઃ ।
ત્વમ્ મૂલાધારસ્થિતોઽસિ નિત્યમ્ । ત્વમ્ શક્તિત્રયાત્મકઃ ।
ત્વામ્ યોગિનો ધ્યાયન્તિ નિત્યમ્ ।
ત્વમ્ બ્રહ્મા ત્વમ્ વિષ્ણુસ્ત્વમ્ રુદ્રસ્ત્વમ્ ઇન્દ્રસ્ત્વમ્ અગ્નિસ્ત્વમ્
વાયુસ્ત્વમ્ સૂર્યસ્ત્વમ્ ચંદ્રમાસ્ત્વમ્ બ્રહ્મભૂર્ભુવઃ સ્વરોમ્ ॥ ૬ ॥

ગણાદિ" પૂર્વમુચ્ચાર્ય વર્ણાદિ"તદનમ્તરમ્ ।
અનુસ્વારઃ પરતરઃ અર્ધેન્દુલસિતમ્ ।
તારેણ ઋદ્ધમ્ । એતત્તવ મનુસ્વરુપમ ।
ગકારઃ પૂ"ર્વરુપમ્ । અકારો મધ્યમરુપમ્ ।
અનુસ્વારશ્ચા"ન્ત્યરુપમ્ । બિન્દુરુત્તરરુપમ્ ।
નાદઃ સંધાનમ્ । સંહિતાસંધિઃ । સૈષા ગણેશવિદ્યા ।
ગણક ઋષિઃ । નિચૃદ્ગાયત્રીચ્છંદઃ ।
ગણપતિર્દેવતા । ૐ ગમ્ ગણપતયે નમઃ ॥ ૭ ॥

એકદંતાય વિદ્મહે । વક્રતુણ્ડાય ધીમહિ । તન્નો દંતી પ્રચોદયા"ત્ ॥ ૮ ॥

એકદંતમ્ ચતુર્હસ્તમ્ પાશમમ્કુશધારિણમ્ ।
રદમ્ ચ વરદમ્ હસ્તૈર્બિભ્રાણમ્ રક્તવાસસમ્ ।
રક્તમ્ લમ્બોદરમ્ શૂર્પકર્ણકમ્ રક્તવાસસમ્ ।
રક્તગંધાનુલિપ્તાંગમ્ રક્તપુષ્પૈઃ સુપૂજિતમ્ ।
ભક્તાનુકમ્પિતમ્ દેવમ્ જગત્કારણમચ્યુતમ્ ।
આવિર્ભૂતમ્ ચ સૃષ્ટ્યાદૌ પ્રકૃતે"ઃ પુરુષાત્પરમ્ ।
એવમ્ધ્યાયતિ યો નિત્યમ્ સ યોગી યોગીનામ્ વરઃ ॥ ૯ ॥

નમો વ્રાતપતયે । નમો ગણપતયે । નમઃ પ્રમથપતયે ।
નમસ્તેઽસ્તુ લમ્બોદરાયૈકદંતાય વિઘ્નનાશિને ।
શિવસુતાય વરદમૂ"ર્તયે નમો નમઃ ॥ ૧૦ ॥

## ફલશ્રુતિ

એતદથર્વશીર્ષ યોઅ્ધીતે સ બ્રહ્મભૂયાય કલ્પતે ।
સ સર્વતઃ સુખમેધતે । સ સર્વવિઘ્નૈ"ર્નબાધ્યતે ।
સ પંચમહાપાપા"ત્ પ્રમુચ્યતે ।
સાયમધીયાનો દિવસકૃતમ્ પાપમ્ નાશયતિ ।
પ્રાતરધીયાનો રાત્રિકૃતમ્ પાપમ્ નાશયતિ ।
સાયમ્પ્રાતઃ પ્રયુમ્જાનો અપાપો ભવતિ ।
સર્વત્ર અધીયાનોઅ્પવિઘ્નો ભવતિ ।
ધર્માર્થકામમોક્ષમ્ ચ વિન્દતિ ।
ઇદમ્ અથર્વશીર્ષમ્ અશિષ્યાય ન દેયમ્ ।
યો યદિ મોહા"દ્દાસ્યતિ સ પાપીયાન્ ભવતિ ।
સહસ્ત્રાવર્તનાત્ યમ્ યમ્ કામમ્ અધીતે તમ્ તમ્ અનેન સાધયેત્ ॥ ૧૧ ॥

અનેન ગણપતિમ્ અભિષિંચતિ સ વા"ગ્મી ભવતિ ।
ચતુર્થ્યામ્ અનશ્નન્ જપતિ સ વિદ્યાવાન્ ભવતિ ।
ઇતિ અથર્વણવાક્યમ્ ।
બ્રહ્માદ્યાવરણમ્ વિદ્યાત્ ન બિભતિ કદાચનેતિ ॥ ૧૨ ॥

યો દૂર્વાંકુરૈર્યજતિ સ વૈશ્રવણોપમો ભવતિ ।
યો લાજૈર્યજતિ સ યશોવાન્ ભવતિ સ મેધાવાન્ ભવતિ ।
યો મોદકસહસ્ત્રેણ યજતિ સ વાન્છિત ફલમવાપ્નોતિ ।
યઃ સાજ્યસમિદ્ભિર્યજતિ સ સર્વં લભતે સ સર્વં લભતે ।
અષ્ટૌબ્રાહ્મણાન્ સમ્યગ્ગ્રાહયિત્વા સૂર્યવર્ચસ્વી ભવતિ ।
સૂર્યગ્રહે મહાનદ્યામ્ પ્રતિમાસમ્નિધૌ વા જપ્ત્વા ।
સિદ્ધમંત્રો ભવતિ । મહાવિઘ્ના"ત્ પ્રમુચ્યતે ।
મહાદોષા"ત્પ્રમુચ્યતે । મહાપાપા"ત્ પ્રમુચ્યતે ।
સ સર્વવિદ્ભવતિ સ સર્વવિદ્ભવતિ । ય એવમ્ વેદ
ઇત્યુપનિષત્ ॥ ૧૪ ॥

********

વક્રતુંડ મહાકાય સૂર્યકોતિસમપ્રભ ।
નિર્વિઘ્નમ્ કુરુ મે દેવ સર્વકાર્યેષુ સર્વદા ॥

********